Roll No. | | **EX-3350**

हाईस्कूल (द्वितीय) परीक्षा / High School (Second) Examination

वर्ष / Year - 2026

SET / सेट

D

संस्कृत

SANSKRIT

Total Printed Pages : **8**	Total Questions : **23**	Time : **3** Hours	Maximum Marks : **75**

निर्देशा :

(i) सर्वे प्रश्नाः अनिवार्याः सन्ति।

(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।

(iii) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतभाषायां देयानि।

1 प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयत् – **1×6=6**

(i) 'बालकस्य' इत्यस्मिन् पदे _____ विभक्तिः अस्ति। (चतुर्थी / षष्ठी)

(ii) 'रामाभ्याम्' इत्यस्मिन् पदे _____ वचनम् अस्ति। (बहु / द्वि)

(iii) 'लताभिः' इत्यस्मिन् पदे _____ विभक्तिः अस्ति। (तृतीया / प्रथमा)

(iv) 'नदीम्' इत्यस्मिन् पदे _____ विभक्तिः अस्ति। (द्वितीया / षष्ठी)

(v) अहं _____ मन्दिरं गमिष्यामि। (ह्यः / श्वः)

(vi) विद्यालयं _____ उद्यानम् अस्ति। (परितः / एव)

2 शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षम् 'न' इति लिखत – **1×6=6**

(i) 'शरणम् आगतः' पदे तत्पुरुषः समासः अस्ति।

(ii) त्रयाणां भुवनानां समाहारः इत्यस्मिन् पदे द्वन्द्वसमासः अस्ति।

(iii) 'अनुरूपम्' पदे अव्ययीभावः समासः अस्ति।

(iv) 'मनोरथः' इत्यस्य पदस्य सन्धिविच्छेदं मनः+रथः अस्ति।

(v) 'सु+आगतम् = स्वागतम्' इत्यस्मिन् पदे वृद्धिसन्धिः अस्ति।

(vi) 'जगत्+ईशः = जगदीशः' व्यञ्जनसन्धेः उदाहरणम् अस्ति।

3 एकपदेन उत्तरं लिखत – **1×6=6**

MPBoardHub

(i) चातकः कुत्र वसति?

(ii) कः पिपासुः म्रियते?

(iii) कृशकायः कः आसीत्?

(iv) 'गमनीयम्' पदे प्रत्ययं किम्?

(v) 'त्त्वा' प्रत्ययस्य एकम् उदाहरणम् लिखत।

(vi) 'बुद्धिमान्' इत्यस्मिन् पदे कः प्रत्ययः?

4 युग्ममेलनं कुरुत – **1×6=6**

(अ)	**(ब)**
(i) निर्मलम्	– तनुः
(ii) शरीरम्	– तुल्यवत्सला
(iii) कृतज्ञता	– जलम्
(iv) दुर्बलम्	– कृतघ्नता
(v) सलिलम्	– वृषभम्
(vi) जननी	– समलम्

5 उचितं विकल्पं चित्वा लिखत – **1×6=6**

(i) 'प्राचार्यः' इत्यस्मिन् पदे उपसर्गः अस्ति –

(अ) प्र (ब) प्रा

(स) प्राच् (द) प्रचार

(ii) 'अधिकारः' पदे उपसर्गः अस्ति –

(अ) अधिक (ब) अ

(स) अधि (द) अधिका

(iii) 'अभवन्' पदे वचनम् अस्ति –

(अ) एक (ब) द्वि

(स) बहु (द) कोऽपि नास्ति

(iv) 'पठतु' इत्यस्मिन् पदे धातुः अस्ति –

(अ) पाठ् (ब) पा

(स) गम् (द) पठ्

(v) 'गमिष्यामि' पदे पुरुषः अस्ति –

(अ) प्रथमपुरुषः (ब) मध्यमपुरुषः

MPBoardHub

(स) उत्तमपुरुषः (द) कोऽपि नास्ति

(vi) 'लट् लकारस्य' उदाहरणम् अस्ति –

(अ) पठति (ब) पठेत्

(स) पठतु (द) अपठत्

6 अस्मिन् लोके के एव चक्षुष्मन्तः प्रकीर्तिताः? **2**

अथवा

न्यायाधीशः कस्मै कारागारदण्डम् आदिष्टवान्?

7 वसन्तस्य गुणं कः जानाति? **2**

अथवा

भूकम्पस्य केन्द्रबिन्दुः कः जनपदः आसीत्?

8 कविः कुत्र सञ्चरणं कर्तुम् इच्छति? **2**

अथवा

जननी कीदृशी भवति?

9 कः आत्मानं बलशालिनं, विशालकायं, पराक्रमिणं च कथयति? **2**

अथवा

बुद्धिमती केन उपेता पितुर्गृहं प्रति चलिता?

10 सरसः तीरे के वसन्ति? **2**

अथवा

विमूढधीः कीदृशीं वाचं परित्यजति?

11 निर्देशानुसारं वाच्य परिवर्तनं कुरुत – (कौ द्वौ) **1×2=2**

(i) अहं जलं पिबामि। (कर्मवाच्ये)

(ii) त्वं पत्रं लिखसि। (कर्मवाच्ये)

(iii) कं छायां निवारयति। (कर्मवाच्ये)

(iv) रामेण गृहं गम्यते। (कर्तृवाच्ये)

12 रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत – (कौ द्वौ) **2**

(i) न्यायाधीशः बङ्किमचन्द्रः आसीत्।

(ii) धेनूनाम् माता सुरभिः आसीत्।

MPBoardHub

(iii) महानगरेषु वाहनानाम् अनन्ताः पङ्क्तयः धावन्ति।

13 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य एकं सुभाषितं श्लोकं लिखत। **2**

14 अधोलिखितानि वाक्यानि कः/का, कं/कां प्रति कथयति (कौ द्वौ) **1×2=2**

(i) विरम विरम आत्मश्लाघायाः। _____ कः/का _____ कं/कां

(ii) रे रे धूर्त त्वया दत्तं मह्यं व्याघ्रत्रयं पुरा। _____ कः/का _____ कं/कां

(iii) जानाम्यहं तस्य नामधेयम्। _____ कः/का _____ कं/कां

15 अधोलिखितेषु अशुद्धकारकवाक्यानां शुद्धिः करणीयाः (कौ द्वौ) **1×2=2**

(i) गणेशः मोदकं रोचते।

(ii) जलस्य बिना जीवनं नास्ति।

(iii) त्वम् नाम किम्?

(iv) रामं नमः।

16 रिक्तस्थानानि पूरयत – (केचन चत्वारः) **½×4 = 2**

(i) प्राकृतिक-वातावरणे क्षणं सञ्चरणम् _____ लाभदायकं भवति। (अपि / बहिः)

(ii) _____ परभृत् अपि कथ्यते। (मयूरः / पिकः)

(iii) मयूरः _____ इति नाम्नाऽपि ज्ञायते। (अहिभुक् / भृशम्)

(iv) पर्यावरणसंरक्षणम् _____ प्रकृतेः आराधना। (एव / अत्र)

(v) अवक्रता यथा _____ । (वाचं / चित्ते)

(vi) एक एव _____ मानी। (खगो / अजो)

17 अधोलिखितानि वाक्यानि घटनानुसारेण क्रमेण लिखत **½×4 = 2**

(i) एकः वानरः तस्य पुच्छं धुनाति।

(ii) एकः सिंहः सुखेन विश्राम्यति।

(iii) क्रुद्धः सिंहः इतस्ततः धावति।

(iv) वानराः बारं बारं सिंहं तुदन्ति।

18 अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – **3**

आलस्यं हि मनुष्याणां, शरीरस्थो महान् रिपुः।
नास्त्युद्यमसमो बन्धुः, कृत्वा यं नावसीदति॥

प्रश्नाः –

(i) मनुष्याणां महान् रिपुः कः अस्ति?

MPBoardHub

(ii) कं कृत्वा नरः न अवसीदति?

(iii) केन समो बन्धुः नास्ति?

अथवा

कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम्।
वाष्पयानमाला संधावति वितरन्ती ध्वानम्॥
यानानां पङ्क्तयो ह्यनन्ताः कठिनं संसरणम्।

प्रश्नाः –

(i) शतशकटीयानं किं मुञ्चति?

(ii) का संधावति?

(iii) महानगरे केषां ह्यनन्ताः पङ्क्तयः?

19 अधोलिखितम् गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – **3**

कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्। तेन वित्तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत्। एकदा स पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः पुत्रं द्रष्टुं च प्रस्थितः। परमर्थकाश्येन पीडितः स बसयानं विहाय पदातिरेव प्राचलत्।

प्रश्नाः –

(i) निर्धनो जनः किम् उपार्जितवान्?

(ii) सः कुत्र सफलो जातः?

(iii) एकदा सः पिता कं द्रष्टुं प्रस्थितः?

अथवा

'यतो हि अयमन्येभ्यो दुर्बलः। सर्वेष्वपत्येषु जननी तुल्यवत्सला एव। तथापि दुर्बले सुते मातुः अभ्यधिका कृपा सहजैव' इति। सुरभि वचनं श्रुत्वा भृशं विस्मितस्य आखण्डलस्यापि हृदयमद्रवत्। स च तामेवमसान्त्वयत् – 'गच्छ वत्से! सर्वं भद्रं जायेत। अचिरादेव चण्डवातेन मेघरवैश्च सह प्रवर्षः समजायत। लोकानां पश्यताम् एव सर्वत्र जलोपप्लवः सञ्जातः।

प्रश्नाः –

(i) सर्वत्र कः सञ्जातः?

(ii) सुरभि वचनं श्रुत्वा भृशं कस्य हृदयमद्रवत्?

(iii) सर्वेष्वपत्येषु जननी कीदृशी?

20 अधोलिखितम् नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – **3**

पिकः – अलम् अलम् अति विकत्थनेन। किं विस्मर्यते यत्

काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः।
वसन्तसमये प्राप्ते काकः काकः पिकः पिकः॥

MPBoardHub

काकः – रे परभृत्! अहं यदि तव सन्ततिं न पालयामि तर्हि कुत्र स्युः पिकाः? अतः अहम् एव करुणापरः पक्षि सम्राट् काकः।

प्रश्नाः –

(i) पिक काकयोः वर्णः कः?

(ii) कस्मिन् समये काकः काकः पिकः पिकः?

(iii) कः पिकस्य सन्ततिं पालयति?

अथवा

विदूषकः – अहं पुनः पृच्छामि। किं नामधेया युवयोर्जननी?

लवः – तस्याः द्वे नाम्नी।

विदूषकः – कथमिव?

लवः – तपोवनवासिनो देवीति नाम्नाह्वयन्ति, भगवान् वाल्मीकिर्वधूरिति।

रामः – अपि च इतस्तावद् वयस्य! मुहूर्तमात्रम्।

विदूषकः – आज्ञापयतु भवान्।

रामः – अपि कुमारयोरनयोरस्माकं च सर्वथा समरूपः कुटुम्बवृत्तान्तः।

प्रश्नाः –

(i) तपोवनवासिनः लवस्य मातरं केन नाम्ना आह्वयन्ति?

(ii) वधूरिति नाम्ना कः आह्वयति?

(iii) कुमारयोः रामश्च कुटुम्बवृत्तान्तः कीदृशः अस्ति?

21 भवतः नाम राजेन्द्रः अस्ति। भवान् स्वप्राचार्यस्य कृते दिनद्वयस्य अवकाशार्थम् एकं प्रार्थनापत्रं संस्कृते लिखत। **4**

अथवा

स्वभगिन्याः विवाहे आमन्त्रयितुं स्वमित्रं प्रति पत्रं संस्कृते लिखत।

22 अधोलिखितम् अपठितगद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि लिखत – (केचन चत्वारः) **4**

अमर्त्यसेनः इति नाम एव संस्कृतमयम्। अमर्त्यसेनवर्यस्य जन्म शान्तिनिकेतने अभवत्। अस्य नाम गुरुदेवेन रवीन्द्रनाथवर्येण चितम्। अस्य नाम निर्दिशन् सः उक्तवान् आसीत् – 'अमर्त्यसेनः' इत्येषः शब्दः संस्कृतमूलः, अतः एतस्य उच्चारणं स्पष्टं स्यात्, यतः अर्थपरिवर्तनं न भवेत्। शान्तिनिकेतने वसन् अमर्त्यसेनः बाल्ये संस्कृताभ्यासं कृतवान्। तस्य तीव्रः अभिलाषः अपि आसीत् यत् मातामहः क्षितीशमोहनसेन इव अहम् अपि प्रसिद्धः संस्कृतविद्वान् भवेयम् इति।

प्रश्नाः –

(i) अमर्त्यसेनः कदा संस्कृताभ्यासं कृतवान्?

(ii) शान्तिनिकेतने कस्य जन्म अभवत्?

(iii) अमर्त्यसेनः इति नाम कीदृशम् अस्ति?

MPBoardHub

(iv) गुरुदेवेन रवीन्द्रनाथवर्येण अमर्त्यसेनः विषये किम् उक्तवान् आसीत्?

(v) किं भवितुम् अमर्त्यसेनस्य तीव्रः अभिलाषः आसीत्?

(vi) अमर्त्यसेनस्य नाम केन चितम्?

23 अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायां निबन्धं लिखत – **4**

(i) देववाणी संस्कृत

(ii) प्रियं मे भारतम्

(iii) महाकविः कालिदासः

(iv) पर्यावरणम्

MPBoardHub